# मनोगतम् [०२.२८]- ८१-उपाख्यानम् 'मनकीबात', प्रसा.तिथि: - २६-सेप्टेम्बर्'२०२१

[भाषान्तरम् - डॉ.श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

*****

मम प्रियाः देशवासिनः, नमस्कारः! भवन्तः जानन्ति यत् अन्यतमावश्यकस्य कार्यक्रमस्य कृते मया अमेरिकादेशः गन्तव्यः, तर्हि मया चिन्तितं यत् भद्रं भविष्यति यद्यहम् अमेरिका-गमनात् प्रागेव 'मनकीबात'-कार्यक्रमस्य ध्वन्यङ्कनं कुर्याम् | सेप्टेम्बर-मासे यस्मिन् दिने 'मनकीबात'-इत्यस्य प्रसारणमस्ति, तस्मिन्नेव दिनाङ्के अपरमपि महत्वपूर्ण-दिनं वर्त्तते | अञ्जसा तु वयं बहूनि दिनानि स्मरामः, विभिन्न-प्रकारकान् दिवसान् अपि आयोजयामः, अथ च, निजगृहे यदि युवानः पुत्री-पुत्राः भवेयुः चेत् ते पृष्टाः सन्तः अशेष-वत्सरस्य दिनानां समग्रां सूचीं भवन्तं श्रावयिष्यन्ति, किञ्च अपरमेकं दिनम् एतादृशं वर्तते यद्धि अस्माभिः सर्वैः अपि स्मरणीयः, तथा च, दिनमिदम् एतादृशमस्ति, यद्धि भारतस्य परम्पराभिः सुबहु संगतम् अस्ति | शताब्देभ्यः याभिः परम्पराभिः वयं संयुताः स्मः, ताभिः संयोजकमिदं दिनम् | अयमस्ति - 'विश्वनदी-दिवसः' |

अस्माकं चिन्तनेषु प्रोक्तम् - "पिबन्ति नद्यः, स्वय-मेव नाम्भः"

अर्थात् नद्यः स्वीयं जलं स्वयमेव नैव पिबन्ति, परञ्च परोपकारार्थं प्रददति | अस्माकं कृते नद्यः भौतिकवस्तु नास्ति, अस्माकं कृते नद्यः जीवत् एककं वर्तते, अत एव, नूनम्, तदर्थमेव वयं, नदीः मातरं वदामः | अस्मदीयानि भवन्तु नाम अनेकानि पर्वाणि, विविधाः उत्सवाः वा हर्षविषयाः, एते सर्वेऽपि अस्माकम् एतासां मातृणाम् अङ्केषु एव भवन्ति |

भवन्तः जानन्ति एव - माघ-मासस्य आगमनानुपदमेव, अस्माकं देशे अनेके जनाः पूर्ण-मासं यावत्  मातुः गङ्गायाः वा कस्याश्चित् अपरस्याः नद्याः तटे कल्पवासम् आचरन्ति | साम्प्रतन्तु एषा परम्परा नैवास्ति, परञ्च पूर्वस्मिन् काले तु परम्परा आसीत् यत् गृहे स्नानाचरणावसरेऽपि नदीनां स्मरणं क्रियते स्म, परम्परा एषा अद्यत्वे प्रायेण लुप्ता जाता आहोस्वित् कुत्रचित् किञ्चित् अल्पमात्रायाम् अवशिष्टा भवेत्, किञ्च एका अतितरां भूयसी परम्परासीत्, या प्रातः एव स्नानाचरणावसरे एव विशालभारतस्य यात्रां कारयति स्म, मानसिकयात्राम्! देशस्य प्रतिकोणं संयोजनस्य प्रेरणा भवति स्म | तथा च, तत् किमासीत् यत् भारते स्नानवेलायां श्लोकोच्चारणस्य परम्परा प्रवर्तते स्म -

गंगे! च यमुने! चैव, गोदावरि! सरस्वति!

नर्मदे! सिन्धु-कावेरी! जलेऽस्मिन् सन्निधिं कुरु ||

पूर्वस्मिन् काले अस्माकं गृहेषु कुटुम्बस्य वरिष्ठाः जनाः बालकान् एतान् श्लोकान् स्मारयन्ति स्म, एवं हि अस्माकं देशे नदी-विषयिणी आस्था अपि समुत्पन्ना भवति स्म | विशालभारतस्य मानचित्रम् मनसि अङ्कितं जायते स्म | नदीः प्रति संयोजनं भवति स्म | यां नदीं वयं

मातृरूपेण अवगच्छामः, पश्यामः, जीवामः च, तां नदीं प्रति अन्यतमः आस्थाभावः उदेति स्म | एका संस्कार-प्रक्रिया आसीत् |

सखायः, यदा वयम् अस्मदीये देशे नदीनां महिम्नः वृत्तं वदामः, तर्हि स्वाभाविकतया प्रत्येकमपि जनः प्रश्नम् उत्थापयिष्यति, प्रश्नोत्थापनस्य तस्य अधिकारोऽप्यस्ति, तथा चास्य उत्तर-प्रदानम् अस्ति अस्मदीयं दायित्वमपि | कश्चन अपि प्रक्ष्यति यत् भोः! भवान् नदीनाम् एतावन्ति गीतानि गायति, नदीं मातरं कथयन् अस्ति, तर्हि एताः नद्यः कथं प्रदूष्यन्ते? अस्माकं शास्त्रेषु तु नदीषु ईषदपि प्रदूषणम् असम्यग् कथितम् | तथा च, अस्मदीयाः परम्पराः अपि एतादृश्यः अवर्तन्त, भवन्तस्तु जानान्ति - अस्माकं भारतस्य यः पश्चिमीयः भागः अस्ति, विशेषेण गुजरात-राजस्थानयोः, तत्र जलस्य बहु अभावः अस्ति | अनेकवारं दुर्भिक्षं सञ्जायते | अधुना, एतदर्थमेव तत्रत्ये समाजजीवने एका नूतना परम्परा विकसिता | गुजरात-राज्ये यथैव वर्षा आरभते, तदा 'जल-जीलणी'-एकादशी आमान्यते | अर्थात् अद्यतने युगे वयं यत् 'Catch the Rain'- इति कथयामः - तदेव तत् वृत्तं यत् जलस्य प्रत्येकमपि बिन्दोः सञ्चयः -' जल-जीलणी' | तथैव वृष्टेः अनन्तरं बिहार-राज्ये पूर्वीयेषु च भागेषु छठ-महापर्व आमान्यते | आशासे यत् छठ-पूजाम् अभिलक्ष्य नदीनां तटानां, घट्टानां च स्वच्छता-परिष्कारयोः सन्नद्धता आरब्धा स्यात् | वयं नदीनां स्वच्छता-कार्याणि तासाञ्च प्रदूषण-मुक्ति-कार्याणि सर्वेषां प्रयासैः सहयोगेन च नूनं कर्तुं पारयामः | 'नमामि गंगे मिशन' - इति कार्यक्रमः अपि साम्प्रतं अग्रेसरति, अत्र सर्वेषां प्रयासानां, एकप्रकारेण जन-जागृतेः, जन-आन्दोलनस्य च, महती भूमिका वर्तते |

सखायः, यदा नद्याः वृत्तं प्रवर्तते, मातुः गङ्गायाः वृत्तं भवति, तदा एकमपरं वृत्तं प्रत्यपि भवतां ध्यानम् आकर्षयितुं मनः करोति | 'नमामि गंगे'-कार्यक्रमस्य वृत्तं प्रवर्तते, तदा अवश्यमेव अपरस्यैकस्य वृत्तस्योपरि भवताम् अवधानं गतं स्यात्, अथ च, अस्मदीयानां युव-जनानां ध्यानन्तु नूनमेव गतं स्यात् | अद्यत्वे एकः विशेषः E-ऑक्शन्- इति सघोष-विक्रयः प्रचलति | अयं वैद्युदाणविकः सघोष-विक्रयः तेषाम् उपहाराणां भवति, ये काले-काले जनाः मह्यं दत्तवन्तः | अमुना सघोष-विक्रयेण यद्धनं लप्स्यते, तत् 'नमामि गंगे'-अभियानाय एव समर्प्यते | भवन्तः यया आत्मीय-भावनया मह्यम् उपहारान् प्रददति, तामेव भावनाम् अभियानमिदम् इतः परमपि दृढतरं विदधाति |

सखायः! देशे सर्वत्र नदीः पुनर्जीविताः कर्तुं, जलस्वच्छतायै, प्रशासनं समाजसेविसङ्घटनानि च निरन्तरं कार्याणि कुर्वन्ति । न तु अद्य आरभ्य, दशकेभ्यः एतादृशं प्रवर्तते । कतिपय-जनाः तु एतादृशेभ्यः कार्येभ्यः समर्पितात्मानः भवन्ति । एषा एव परम्परा, एष प्रयासः, एषा आस्था च अस्माकीनाः नदीः रक्षति । हिंदुस्थानस्य कस्मिंश्चित् दिग्भागे यदा एतादृशाः प्रसङ्गाः श्रूयन्ते तदा एवं प्रकारकाणि कार्याणि कुर्वद्भ्यः महद्-आदरभावः मम मनसि उत्पद्यते । मम मनः करोति यत् तान् उत्पन्नभावान् भवद्भ्यः सूचयामि इति । अवलोकयन्तु भवन्तः, तमिलनाडुराज्यस्य वेल्लोर-तिरुवन्नामलाई-जनपदीयम् एकम् उदाहरणं वक्तुम् इच्छामि । अत्र नागानधी-नाम्नी एका नदी प्रवहति । एषा नागानधी वर्षेभ्यः पूर्वं शुष्का जाता । एतेन कारणेन तत्रत्य-जलस्तरः अपि अत्यन्तं अधः गतः । परं तत्रत्य

महिलाभिः सङ्कल्पितं यत् ताः, नदीं पुनर्जीवितां करिष्यन्ति । ततः परं किम्? ताभिः जनाः संयोजिताः, जनसहयोगेन
नद्यः खाताः, अवष्टम्भाः निर्मिताः, पुनःपूरणकूपाः च विनिर्मिताः ।

सखायः, भवन्तः अपि ज्ञात्वा प्रसन्नाः भविष्यन्ति यत्
सा नदी अधुना जलपूरितास्ति । यदा च नदी जलपूरिता भवति तदा मनः एतावत् सुखम् अनुभवति, अहं प्रत्यक्षम् एतत् अनुभूतवान् ।

भवत्सु अनेके विज्ञाताः स्युः यत्
यस्मिन् साबरमतीतटे महात्मगान्धिः साबरमती-आश्रमं
निर्मितवान्, कतिपय-दशकेभ्यः तत्र एषा साबरमती-नदी शुष्का जाता । वर्षे षट् वा अष्टौ मासान् यावत् जलं नैव दृश्यते स्म । परम् अधुना नर्मदा-साबरमती-नद्यौ योजिते, तर्हि अधुना यदि
भवन्तः अमदावादनगरं गमिष्यन्ति, तर्हि साबरमतीजलं
भवतां मनांसि प्रफुल्लितानि करिष्यति | एवंप्रकारेण अनेकानि कार्याणि , यथा तमिलनाडुराज्ये अस्माकम् एताः भगिन्यः कुर्वत्यः
सन्ति, देशस्य विभिन्नभागेषु चलन्ति | अहं तु जानामि,
धार्मिकपरम्पराभिः सम्बद्धाः अस्माकं स्वामि-महात्मानः सन्ति, गुरवः वर्तन्ते, तेऽपि स्वकीयया आध्यात्मिकयात्रया सह अद्भ्यः नदीभ्यः च सुबहु किमपि कुर्वन्ति, केचन
च नदीतीरेषु वृक्षारोपणाभियानं चालयन्ति । तर्हि क्वचित् नदीषु प्रवाह्यमानम् अशुद्धं जलम् अवरोध्यते ।

सखायः,
'विश्वनदीदिनम्' आचरामः, तर्हि एतस्मै कार्याय समर्पितान् अहं वर्धापयामि, तेषाञ्च अभिनन्दनं करोमि । अथ च, प्रत्येकम् अपि, नद्याः समीपं निवसद्भ्यः जनेभ्यः, देशवासिभ्यः च आग्रहं करोमि

यत् भारते प्रत्येकस्मिन् कोणे वर्षे एकवारं नदी-उत्सवः अवश्यम् आचरणीयः ।

मम प्रियाः देशवासिनः, लघुविषयाणां लघुवस्तूनां च अल्पत्वं कदापि नैव चिन्तनीयम् | लघुप्रयासैः कदाचित् महत्परिवर्तनानि जायन्ते। यदि महात्मगान्धिनः जीवनं पश्यामः, तर्हि प्रत्येकं क्षणविषये अनुभविष्यामः यत् लघुविषयाणां तदीये जीवने कियती महत्ता आसीत् । अथ च, लघुविषयान् आधृत्य महत्सङ्कल्पाः कथं तेन साधिताः। अद्यतनैः युवभिः एतत् अवश्यम् अवगन्तव्यं यत् स्वच्छताभियानेन कथं स्वतन्त्रान्दोलनं निरन्तरम् ऊर्जान्वितं कृतम् । एषः महात्मगान्धिः एव आसीत् येन स्वच्छता जन-आन्दोलनत्वेन कृता । महात्मगान्धिः स्वच्छतां स्वाधीनतायाः स्वप्नेन सह योजितवान् । अद्य एतावद्दशकानाम् अनन्तरं स्वच्छतान्दोलनं पुनरेकवारं देशाय नवभारतस्य स्वप्नेन सह योजनस्य कार्यं कुर्वद् अस्ति । अस्माकं स्वभावपरिवर्तनस्य अपि अभियानरूपं जायमानम् अस्ति । वयम् एतन्न विस्मरेम यत् स्वच्छता कश्चन कार्यक्रमः अस्ति । स्वच्छता वंशानुगतानां संस्काराणां सङ्क्रमणस्य किञ्चित् दायित्वम् अस्ति । अनुवांशिकम् अस्ति एतत् स्वच्छताभियानम्, तदा सम्पूर्णे समाजजीवने स्वच्छतास्वभावः निर्मितः भवति । अत एव वर्षं वर्षद्वयं वा, प्रशासनम् अपरप्रशासनं प्रति वा, एवं विषयः नास्ति, वंशानुवंशम् अस्माभिः स्वच्छताविषये जागर्ति-पुरस्सरं अविरतरूपेण, विना विश्रान्तिं, महत्श्रद्धया च संयुक्तैः भाव्यम्, अथ स्वच्छताभियानं सततं प्रवर्तनीयम् । पूर्वम् अपि अहम् उक्तवान् यत् एषा स्वच्छता बापू-

वर्यस्य कृते देशपरतया महती श्रद्धाञ्जलिरूपा अस्ति, एषः च स्वच्छतारूपः श्रद्धाञ्जलिः अस्माभिः निरन्तरं सततं च प्रदातव्यः ।

सखायः, जनाः जानन्ति यत् स्वच्छतायाः विषये कथनावसरम् अहं कदापि न त्यजामि, अतः तस्मात् अस्माकं 'मनकीबात'-क्रार्यक्रमस्य केनचित् श्रोत्रा श्रीमता रमेशपटेलेन लिखितम् - अस्माभिः बापू-वर्यस्य
शिक्षया एतस्मिन् स्वतन्त्रतायाः "अमृतमहोत्सवे" अर्थशुचितायै अपि सङ्कल्पः स्वीकरणीयः
। यथा शौचालयानां निर्माणेन निर्धनानां गरिमा वर्धितः, तथा एव आर्थिकी
शुचिता, निर्धनेभ्यः अधिकारान् सुनिश्चितान् करोति, तेषां जीवनं सरलं करोति । इदानीं भवन्तः जानन्ति -
जनधनलेखाविषये देशे यद् अभियानम् आरब्धम् । एतेन कारणेन अद्य निर्धनेभ्यः तदीयम् अधिकारधनं साक्षात् तदीय-बैङ्कलेखासु प्रेष्यते । येन कारणेन भ्रष्टाचारावरोधः महता प्रमाणेन जातः । अपि च, एतत् तु सम्यक् यद् अर्थशुचौ प्रविधिः अत्यन्तं सहयोगं कुर्यात् । अस्मभ्यं हर्षविषयः एषः यत् अद्यत्वे ग्राम्यक्षेत्रेषु अपि fin-tech UPI इत्यनेन डिजिटल्-माध्यमेन धनव्यवहारं कर्तुं सामान्याः मानवाः अपि प्रभवन्ति, तस्य प्रचलनम् एधतेतराम्
। भवद्भ्यः कांचन सांख्यिकीं सूचयामि । भवन्तः गर्वम् अनुभविष्यन्ति यत् गते ऑगस्ट्मासे, एकस्मिन् एव मासे UPI द्वारा पञ्चपञ्चाशदधिक-त्रिशतकोटिरूप्यकात्मकः धनव्यवहारः जातः, अर्थात् प्रायः सार्धत्रिशतकोटितः अपि अधिकः, - इत्युक्ते वयं वक्तुं शक्नुमः यत् ऑगस्ट्-मासे सार्धत्रिशतकोटितः अपि अधिकाय
धनसम्बद्धाय डिजिटल्-विषयकाय आदानप्रदानाय UPI-इत्यस्य प्रयोगः

कृतः अस्ति । अद्य सामान्यतया षट्-लक्ष-कोटितः अपि अधिक-धनराशेः व्यवहारः डिजिटल्-UPI-माध्यमेन भवति । एतेन देशस्य अर्थव्यवस्थायां स्वच्छता पारदर्शिता च आयातः । अथ च, वयं जानीमः यत् अधुना fin-tech इत्यस्य प्रविधेः महत्वम् एधितम् ।

सखायः, यथा बापू-वर्येण स्वच्छता स्वाधीनतया सह योजिता आसीत्, तथैव खादी-निर्मितिः स्वातन्त्र्यप्रतीकत्वेन स्थापिता आसीत् । अद्य स्वतन्त्रतायाः पञ्चसप्ततितमे वर्षे वयं यदा स्वतन्त्रायाः अमृतमहोत्सवम् आचरन्तः स्मः, तदाद्य वयं सन्तोषपूर्वकं वक्तुं शक्नुमः यत् स्वतन्त्रतायाः आन्दोलने यः गौरवः खादी-वस्त्राणाम् आसीत्, अस्माकं युववर्गः अपि खादीवस्त्रेभ्यः तद्वद् गौरवं प्रददाति । अधुना खादीवस्त्राणां  हस्तवेम-वस्त्राणाम् चोत्पादनम् अनेकगुणितम् एधितम्, तेषां च अभियाचना अपि एधिता । भवन्तः अपि जानन्ति यत् एतादृशाः अनेके अवसराः आगताः यदा दिल्लीराज्यस्य खादी-आपणेषु कस्मिंश्चित् दिने एककोटितोऽप्यधिकस्य राशेः व्यापारः जातः । अहं पुनरपि भवतः भवतीः च सर्वान् स्मारयितुम् इच्छामि यत् ओक्टोबरमासस्य द्वितीये दिने बापूवर्यस्य जन्मजयन्त्वसरे वयं पुनरेकवारं कीर्तिमानं रचयेम । भवतां नगरे यत्र खादी-निर्मितिः विक्रीयते, हस्तवेमनिर्मितिः विक्रीयते, हस्तशिल्पः विक्रीयते, अथ च, अधुना दीपावलीपर्व आसन्नप्रायः, पर्वणां काले खादी-हस्तवेमनिर्मिति-कुटीरोद्योग-सम्बद्धं भवताम् क्रयणं ‘Vocal For Local’-इत्यस्मै अभियानाय पोषकं स्यात्, पुरातनानि कीर्तिमानानि ऐषमः ध्वस्तानि करणीयानि ।

सखायः, अमृतमहोत्सवस्य एतस्मिन् कालखण्डे देशे
स्वतन्त्रतायाः इतिहासस्य अनुक्तगाथाः प्रतिजनं प्रापयितुं किञ्चन अभि
यानम् अपि प्रचलति, एतदर्थं च नवोदितलेखकानां, देशस्य विश्वस्य
च यूनाम् आह्वानं कृतम् आसीत् । एतस्मै
अभियानाय एतावता त्रयोदशसहस्राधिकाः स्वकीयं पञ्जीयनं
कृतवन्तः, तदपि चतुर्दशषु विविधभाषासु । मह्यं प्रसन्नताविषयः एषः
अपि
यत् विंशाधिकेभ्यः देशेभ्यः अनेकैः अप्रवासिभारतीयैः अपि एतस्मिन्
अभियाने सहभागितायै स्वेच्छा प्रकटिता । काचित्
अत्यन्तं रुचिपूर्णा सूचना अस्ति, प्रायशः ५०००-तः अधिकाः
नूतनाः नवोदितलेखकाः स्वतन्त्रतासङ्ग्रामस्य कथाः अन्विषन्तः
सन्ति। ये अनुक्ताः नायकाः सन्ति, येषां नामोल्लेखः न
जातः, इतिहासपृष्ठेषु येषां नामानि न दृश्यन्ते, एतेषु अनुक्तेषु
नायकेषु, तेषां जीवनविषये, तत्सम्बद्धानां घटनानां विषये किञ्चित्
लेखितुं सङ्कल्पितम् । एतत् सर्वं देशस्य युवभिः सङ्कल्पितं यत् तेषां
स्वातन्त्र्यवीराणाम् इतिहासः अपि देशस्य समक्षम् आनेष्यामः, येषां
चर्चा गतेषु ७५-वर्षेषु न कृता । सर्वश्रोतृभ्यः मदीयः आग्रहः अस्ति
। शिक्षाजगत्-सम्बद्धेभ्यः मदीयः आग्रहः वर्तते ।

मम प्रियाः देशवासिनः, सियाचिन्-हिमनदविषये वयं
सर्वे जानीमः। तत्र यावत् शैत्यं भवति तस्य सहनं साधारण-मानवानां
वशगतं न भवति। सुदूरं यावत् हिमसाम्राज्यं भवति, वृक्षवनस्पतीनां तु
नाममात्रमपि नास्ति। अत्रत्यं तापमानं शून्यतः षष्ट्यंशं यावन्न्यूनतरं
जायते। कतिपय-दिनपूर्वम्  अस्मिन् दुर्गमे सियाचन्-क्षेत्रे अष्टानां
दिव्यांगजनानां दलेन यत्पराक्रमं प्रदर्शितम्, तत्प्रत्येकं देशवासिनः कृते
गर्वास्पदमस्ति। एतद्दलेन सियाचिन्-हिमनदस्य पंचदशसहस्र-

पदोच्चस्थं 'कुमार-पोस्टेति' सुरक्षापिटकोपरि ध्वजारोहणेन विश्वकीर्तिमानं स्थापितमस्ति। शरीरगताह्वानानां निराकरणेन अस्माकमेतैः दिव्यांगजनैः यच्छौर्यं प्रदर्शितम्, तदखिलदेशस्य कृते प्रेरणास्पदम्। यदैतद्दलस्य सदस्यानां विषये ज्ञास्यन्ति तर्हि भवन्तोऽपि मत्-सदृशम् उत्साहेन मनोबलेन च पूरिताः भविष्यन्ति। एतेषां शूराणां नामानि सन्ति - महेश-नेहरा, उत्तराखंडतः अक्षत-रावतः, महाराष्ट्रस्य पुष्पक-गवांडे, हरियाणातः के.अजयकुमारः, लद्दाखस्य लोब्सांग-चोस्पेलः, तमिलनाडुतः मेजर-द्वारकेशः, जम्मू-कश्मीरस्य इरफ़ान-अहमद-मीरः, हिमाचलप्रदेशस्य च सुश्री चोन्जिन-एन्गमो। सियाचिन्-हिमनदविजयस्य एतदभियानं भारतीयसेनानां विशेषबलानां मार्गदर्शकाणां सहयोगेन सम्पादितम्। अहमेतस्यै ऐतिहासिकोपलब्धये दलसदस्येभ्यः भूरिशः अभिनन्दनं व्याहरामि। एतदस्माकं देशवासिनां "कर्तुं शक्नुमः" 'can do' इति संस्कृत्या, "कर्तुं शक्नुमः" इति निश्चयेन, अपि च "कर्तुं शक्नुमः" इति मनोभावेन साकमेव प्रत्येकमाह्वानस्य सम्मुखीकरणस्य भावमपि ज्ञापयति।

सखायः, अद्य देशे दिव्यांगजनानां कल्याणार्थं नैक-प्रयासाः आरब्धाः। अहम् उत्तरप्रदेशे सम्पाद्यमानस्य एतादृग्प्रयासस्य "वन-टीचर्-वन-कॉल" इत्यस्य विषये ज्ञापितोऽस्मि । बरेलीनगरे विधीयमानः एतद्विशिष्टप्रयासः दिव्यांगबालेभ्यः मार्गदर्शकोऽस्ति। एतदभियानस्य नेतृत्वं डभौरा-गंगापुरस्थ-विद्यालयस्य प्रधानाचार्या दीपमालापांडेय-महाभागा करोति। कोरोनाकाले एतदभियानान्तर्गतं न केवलं बालानां बहुसंख्याकः विद्यालयप्रवेशः सुनिश्चितः, अपितु प्रायशः पंचाशदुत्तर-त्रिशतं शिक्षकाः अपि सेवाभावेन संयोजिताः । एते शिक्षकाः प्रतिग्रामं

गत्वा दिव्यांगबालान् आह्वयन्ति, अन्वेषयन्ति, निकटस्थ-विद्यालयेषु च तेषां प्रवेशं सुनिश्चितं कुर्वन्ति। दिव्यांगजनानां कृते दीपमाला-महाभागायाः तस्याः शिक्षकसहयोगिनां च एतं पुण्यप्रयासमहं भूरिशः प्रशंसे। शिक्षाक्षेत्रे एतादृशः प्रत्येकं प्रयासः अस्माकं देशस्य भविष्यत् सुतरां परिष्करोति।

मम प्रियाः देशवासिनः, अद्यास्माकं जीवने 'कोरोना'-शब्दः प्रतिदिनं शतशः गुंजितः भवति। कोविड्-एकोनविंशतिः इति विगतशतवर्षेषु दुर्भूतः विकरालः महारोगः अवर्तत। अनेन प्रत्येकं देशवासी बहुशः शिक्षितोऽस्ति। स्वास्थ्यरक्षां आरोग्यं च प्रति अस्माकं जिज्ञासा जागृतिश्च अभिवर्धिते । अस्माकं देशे पारंपरिकरूपेण एतादृशाः प्राकृतिकोत्पादाः प्रचुरमात्रायां उपलब्धाः ये आरोग्यस्य कृते अतीवोपयोगिनः सन्ति। ओडिशायाः कालाहांडीक्षेत्रस्य नांदोलवासी पतायतसाहू-महाभागः अस्मिन् सन्दर्भे नैक-वर्षेभ्यः अद्भुत-कार्यं करोति। तेन प्रायशः सार्धैक-प्रहेलक्षेत्रे औषधीय-पादपारोपणं तेषां विवरणांकनं च सम्पाद्यते। रांचीतः सतीशमहाभागेन पत्रमाध्यमेन अन्यैतादृशी सूचना प्रेषितास्ति। सतीशमहोदयेन झारखंडस्य एलोवेरा अर्थात् घृतकुमारी-ग्रामविषये मम ध्यानमाकर्षितमस्ति। रांचीनगरं निकषा देवरी-ग्रामस्य महिलाभिः मंजू-कच्छप-महाभागायाः नेतृत्वे बिरसा-कृषि-विद्यालयतः घृतकुमार्याः कृषिप्रशिक्षणं अधिगतमासीत्। अनन्तरं ताभिः घृतकुमारीवपनं आरब्धं येन न केवलं स्वास्थ्यक्षेत्रे लाभोऽधिगतः, अपितु एतासां  महिलानां आयः अपि सुतरां वर्धितः। कोविड्-महामारीकालेऽपि ताभिः प्रभूतधनमर्जितं यतो हि हस्तशोधकनिर्मातृभिः ताभ्यः घृतकुमारिपादपानां साक्षात्क्रयो विहितः।

अद्यास्मिन् कार्ये प्रायः चत्वारिंशन्मितानां महिलानां दलं संलग्नमस्ति, नैकप्रहेलक्षेत्रेषु च घृतकुमारीवपनं सम्पाद्यते। ओड़िशायाः पतायतसाहू-महानुभावः भवेत्, देवरी-क्षेत्रीयानां महिलानां दलं वा; एतज्जनैः यथा कृषिकार्यम् आरोग्येन संयोजितं तदन्येषां कृते प्रेरणास्पदमस्ति।

सखायः, ओक्टोबर-मासे द्वितीये दिने लालबहादुरशास्त्रि-वर्यस्यापि जन्मजयन्ती समागच्छति । अस्य स्मृतिः कृषिक्षेत्रे नूतनप्रयोगकर्तृभ्यः शिक्षास्पदमस्ति। औषधीय-पादपानां क्षेत्रे नूतनोद्योगस्थापनं वर्धयितुं “मेडिहब-टी.बी.आई.” इत्याख्यं कल्प-पोषणकेन्द्रं गुजरातस्य आणंदक्षेत्रे कार्यरतमस्ति। औषधीयैः सुगन्धितैश्च पादपैः सम्बद्धेऽस्मिन् संकल्प-पोषणकेन्द्रे अत्यल्पसमये एव पंचदशमितानां नवोद्योगस्थापकानां व्यापारयोजनाः परिपोषिताः सन्ति। अस्य संकल्प-पोषणकेन्द्रस्य साहाय्येनैव सुधा-चेब्रोलू-महाभागया स्वीयः नूतनोद्योगः स्थापितः। तस्याः समवाये महिलाभ्यः प्राथमिकता प्रदीयते, ताभिरेव च नूतनौषधोत्पादनस्य दायित्वं संधार्यते। अन्यैका उद्योगस्वामिनी सुभाश्री-महोदयापि एतेनैव औषधीय-गन्धपादप-मतपोषणकेन्द्रेण साहाय्यमाप्नोति। तस्याः समवायः औषधियुतं कक्षीयं कारयानीयं च सुवासमुत्पादयति। तयैकं औषधीयं आलिन्दोद्यानमपि निर्मितम् यस्मिन् चतुश्शताधिकाः औषधीयपादपाः विद्यन्ते।

सखायः, बालेषु औषधानां औषधीयपादपानां च विषये जागृतिं अभिवर्धयितुं आयुषमन्त्रालयेन मनोरंजकः एकः उपक्रमः आरब्धोऽस्ति। अस्य दायित्वं आचार्यवर्येण आयुष्मान्-महाभागेन स्वीकृतम्। सम्भवतया भवन्तः चिन्तयिष्यन्ति यदेषः आचार्यः आयुष्मान् कः

भवितुं शक्नोति? वस्तुतः आचार्यायुष्मान् एकं चित्रपुस्तकमस्ति, यस्मिन् विविधैः व्यंग्यचित्रैः लघुकथाः प्रस्तुताः। एतन्माध्यमेन घृतकुमारी-अमृता-तुलसी-आमलक-निम्ब-अश्वगंधा-ब्राह्मीसदृशानां आरोग्यकराणाम् औषधीयपादपानां उपयोगाः वर्णिताः सन्ति।

सखायः, अद्यत्वे यथा औषधीयपादपेषु उत्पादेषु च अशेष-जगति जनानां रुचिः वर्धितास्ति, तेन भारतस्य कृते अनन्ताः सम्भावनाः उद्भूताः। विगते काले आयुर्वैदिकौषधीनां अन्योत्पादानां च निर्याते महती वृद्धिः दरीदृष्टा । अहं वैज्ञानिकेभ्यः, शोधकर्तृभ्यः नवोद्योगस्थापकेभ्यश्च निवेदयामि यत्तैः ईदृशोत्पादानां प्रत्यवधानं करणीयं येन जनानां स्वास्थ्यं रोगप्रतिरोधक-शक्तिश्च वर्धयेताम्, युगपदेव च कृषकाणां यूनां च धनागमः अपि सुनिश्चितः जायेत।

सखायः, परम्परागतां कृषिमतिरिच्य अस्मिन्क्षेत्रे विधीयमानाः नूतनप्रयोगाः, विकल्पाश्च सततं स्वजीविकायै माध्यमानि जनयन्ति। पुलवामा-जनपदस्य भ्रातृ-द्वयस्य उदाहरणमत्र उल्लेखनीयम्। जम्मू-कश्मीरस्य पुलवामानिवासिनौ बिलाल-अहमद-शेखः मुनीर-अहमद-शेखश्च यथा नूतनमार्गम् अन्वेषितवन्तौ, तन्निश्चयेन नूतनभारतस्य कृते प्रतिमानं वर्तते । ऊनचत्वारिंशद्-वर्षीयः बिलाल-अहमदः उच्चशिक्षितः नैकोपाधियुतश्चास्ति। असावद्य स्वीयशैक्षिकानुभवानां सदुपयोगेन कृषिक्षेत्रे स्वीयं नूतनोद्योगं संचालयति। बिलालमहोदयेन गृहे कृमिपांसु-एकांशः स्थापितः। एतेनैकांशेन उत्पादितेन जैवोर्वरकेण कृष्युत्पादने न केवलं प्रभूतलाभः अपि तु वृत्यवसराः अपि उपपादिताः। प्रतिवर्षम् एतस्य भ्रातृ-द्वयस्य समवायेन कृषकाः त्रिसहस्र-खारिमितं जैवोर्वरकं प्राप्नुवन्ति। तयोः कृमिपांस्वेकांशे पंचदशजनाः कार्यरताः

सन्ति। तयोरुपक्रमं द्रष्टुं बहवो जनाः आगच्छन्ति। तेषु यूनाम् अधिसंख्यं भवति, ये हि कृषिक्षेत्रे नवाचारं कर्तुमिच्छन्ति। पुलवामा-क्षेत्रस्य शेखभ्रातरौ वृत्तिकांक्षिणामपेक्षया वृत्तिप्रदायकौ अभवताम्। अद्यैतौ न केवलं जम्मू-कश्मीरस्य, अपितु अखिलदेशस्य जनेभ्यः मार्गदर्शनं कुरुतः ।

मम प्रियाः देशवासिनः, सेप्टेम्बरस्य पंचविंशति-दिनांके देशस्य महतः पुत्रस्य पंडित-दीनदयाल-उपाध्यायस्य जन्म-जयंती अवर्तत । दीनदयालमहाभागः विगत-शताब्दे उत्तमोत्तम-विचारकेषु अग्रगण्यः अवर्तत। तेषाम् अर्थदर्शनं, समाज-क्षमीकरण-नीतयः, तेन प्रदर्शितः च अन्त्योदयमार्गः अद्यापि प्रासंगिकः प्रेरणास्पदं चास्ति। वर्षत्रयपूर्वं सेप्टेम्बरे पंचविंशतौ दिने तस्यैव जन्म-जयन्त्याम् 'आयुष्मान्-भारत-योजनेति' संसारस्य बृहत्तमा स्वास्थ्याश्वासन-योजना आरब्धासीत् । अधुना पर्यन्तं देशस्य सपादद्वि-कोटितोऽप्यधिकाः निर्धनाः आयुष्मान्-भारत-योजनान्तर्गतं चिकित्सालयेषु पंचलक्षरूप्यकमितं निःशुल्कं चिकित्सालाभं प्राप्तवन्तः सन्ति। निर्धनानां कृते एतादृशी महती योजना दीनदयालमहाभागस्य अंत्योदयदर्शनाय समर्पितास्ति। अद्य भारतस्य युवजनाः यदि तेषां मूल्यादर्शाणाम् अनुपालनं कुर्वन्तु चेत्तर्हि बहुलाभकरं भविष्यति। लखनऊनगरे एकदा दीनदयालमहाभागेन उदीरितमासीद्यत् "उत्कृष्ट-विचाराः गुणाश्च वयं समाजादेव अवाप्नुमः। समाजस्य एतदृणमस्माभिः प्रतिशोधनीयं भवति - इत्यस्माभिः सर्वदैव चिन्तनीयम्।" दीनदयालमहोदयेन शिक्षितं यत्समाजात् देशाद् वा यत्किमपि वयमवाप्नुमः तस्य कृते वयं ऋणिनः  भवामः।

तदृणमस्माभिः कथं प्रतिदेयमिति सर्वदैव चिन्तनीयम्। अद्यतनानां यूनां प्रत्येषः तेषां महान् सन्देशः वर्तते।

सखायः, दीनदयालमहाभागस्य जीवनेन वयमधिगच्छामः यत्पराजयः कदापि नैव स्वीकरणीयः। विपरीतासु राजनैतिकीषु वैचारिकासु च परिस्थितिष्वपि भारतविकासस्य स्वदेशीयं प्रतिमानं तेन दृढतया संधारितम् । अद्य बहवो युवजनाः निर्मितमार्गापेक्षया नूतनसरणिषु गन्तुमुत्सुकाः। ते भिन्नतया कार्यं सम्पादयितुमिच्छन्ति। दीनदयालमहोदयस्य जीवनात् ते विपुलां प्रेरणामधिगन्तुं शक्नुवन्ति। अत एव युवजनेभ्यः ममाग्रहोऽस्ति यत्ते तस्य विषये अवश्यमेव जानन्तु।

मम प्रियाः देशवासिनः, वयम् अद्य विविधान् विषयान् चर्चितवन्तः | यथा वयं चर्चामपि कुर्वन्तः स्मः, आगम्यमानः कालः उत्सवानां कालोऽस्ति | अशेष-देशः मर्यादापुरुषोत्तमस्य श्रीरामस्य असत्योपरि विजयस्य पर्व अपि आमानयिष्यति | परञ्च उत्सवेऽस्मिन् अस्माभिः अपरस्य एकस्य युद्धस्य विषये स्मरणीयम् अस्ति - तदस्ति कोरोना-इत्यनेन साकं देशस्य युद्धम् | भारतीय-वृन्दं

युद्धेऽस्मिन् प्रतिदिनं नूतनानि आभिलेख्यानि विरचयति | सूच्यौषधि-क्षेत्रे देशेन कतिपयानि तादृन्शि आभिलेख्यानि निर्मितानि येषां चर्चा अशेष-जगति जायते | युद्धेऽस्मिन् प्रत्येकमपि भारतवासिनः भूमिका महत्त्वाधायिनी वर्तते | अस्माभिः स्वीय-क्रमानुसारं सूच्यौषधन्तु स्वीकरणीयमेव, परञ्च वृत्तमिदमपि अवधेयं यत् न कश्चन अपि अस्मात् सुरक्षाचक्रात् निर्गतः स्यात् | निज-परिवर्तिनि क्षेत्रे येन सूच्यौषधं नैव स्वीकृतं, सोऽपि सूच्यौषध-केन्द्रं यावत् सन्नेयः अस्ति |

सूच्यौषध-स्वीकृतेः अनन्तरमपि संविद् पालनीयास्ति | आशासे युद्धेऽस्मिन् पुनरेकवारं 'टीम-इंडिया'- इति भारतीय-वृन्दं स्वीयं ध्वजम् उत्तोलयिष्यति | वयम् आगामिनि क्रमे अपरान् अपि काञ्श्चन् विषयान् आधृत्य 'मनोगतं' करिष्यामः | भवतां सर्वेषामपि देशवासिनां कृते, उत्सव-विषयिण्यः भूयस्यः शुभकामनाः| धन्यवादः |

*****

[भाषान्तरम् - डॉ.श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः - baldevanand.sagar@gmail.com